**Shikshan Sanshodhan** : Journal of Arts, Humanities and Social Sciences
Monthly, Peer-Reviewed, Refereed, Indexed Journal
Volume - 9, Issue - 4, April - 2026
ISSN(o): 2581-6241
Impact Factor: 9.134

DOIs:10.2018/SS/202604010 --:-- Research Paper / Article / Review

# अनुदितामृतफलोपन्यासस्य विषयविन्यासे शैलीतत्वम्: एकम् अनुशीलनात्मकमध्ययनम्।

**Adweta Dash,**
Ph.D. Research Scholar in Sanskrit, Department of Sanskrit, Pali & Prakrit,
Visva-Bharati, Santiniketan, Bolpur, India.
Email: adwetadash56@gmail.com

**शोधसारः** प्रस्तुतशोधलेखे मनोजदासेन विरचितस्य अमृतफलोपन्यासस्य गोपबन्धुमिश्रेण विहितं संस्कृतानुवादस्य शैलीगतानां संरचनात्मकानां च पक्षाणां विश्लेषणं विहितम्। एषः उपन्यासः राजा-भर्तृहरेः वैराग्यस्य पौराणिककथायाः आधुनिकजीवनस्य द्वन्द्वानां च मध्ये सेतुमिव कार्यं करोति। अत्र गवेषणायाः मुख्योद्देश्यं वर्तते यत् लेखकः कथम् अलौकिक-यथार्थवाद' (Magic Realism) तथा 'द्वि-भाषिक-कथा' (Dual Narrative), प्रतीकात्मकता, Meta fiction इत्यनयोः प्रयोगेण दार्शनिकं विमर्शं स्थापितवान्। अयं शोधालेख्यः भाषया प्रतीकैश्च नश्वरता-अमरत्वयोः संघर्षमपि स्पष्टीकरोति। अतः अस्मिन्सन्दर्भे ***अनुदितामृतफलोपन्यासस्य विषयविन्यासे शैलीतत्वम्: एकम् अनुशीलनात्मकमध्ययनम्*** इति शिषकान्वीतम् शोधपत्रम् अग्रे आलोचयामः।

**बीजशब्दाः**- अमृतफलम्, शैलीविज्ञानम्, अलौकिक-यथार्थवादः, भर्तृहरिः, अमरनाथः, प्रतीकात्मकता, Dual Narrative, मेटा-फिक्शन ।

## 1. अमृतफलोपन्यासस्य लेखकस्य जीवनवृत्तम्

'अमृतफल' इति प्रसिद्ध ओड़िआ उपन्यासस्य कर्त्ता प्रख्यातसाहित्यकारः मनोज दासः अस्ति। सः १९३४ तमे वर्षे फरवरी-मासस्य सप्तविंशति (२७) दिनाङ्के ओड़िशा राज्यस्य बालेश्वरमण्डलस्य शंखारीग्रामे जन्मगृहीतवान्। मनोज दासः ओड़िआ-आङ्ग्लभाषयोः एकः सुपरिचितः कथाकारः, औपन्यासिकः एवं स्तम्भकाररासीत्। तस्य साहित्यकृतिषु मानवीय- संवेदना, मनोविज्ञानम् एवम् आध्यात्मिकतायाः सुन्दरः समन्वयः परिदृश्यते। 'अमृतफल' इत्यस्य उपन्यासस्य कृते सः 'सरस्वती सम्मानेन' विभूषितः अभवत्। एतदतिरिक्तम् पद्मश्री, पद्मभूषण एवं केन्द्र-साहित्य-अकादमीपुरस्कारैः अपि सः सम्मानितः। पण्डिचेरीस्थिते श्रीअरविन्दाश्रमे स्थित्वा दीर्घकाल पर्यन्तं शिक्षादानसाहित्यसाधनाञ्च कृतवान्। २०२१ तमे वर्षे अप्रैल-मासस्य सप्तविंशति- (२७) दिनाङ्के एतस्य महानसारस्वतसाधकस्य मृत्युः अभवत्।

## 2. अनुवादकस्य प्रो. गोपबन्धु-मिश्रस्य जीवनवृत्तम्

प्रो. गोपबन्धु-मिश्रः संस्कृतजगतति लब्धप्रतिष्ठविद्वान्प्रखरशिक्षाविद्कुशलप्रशासकश्च वर्तते। अस्य जन्म १९५९ तमे वर्षे ओडिशाराज्यस्य नयगढ मण्डले अभवत्। सः काशीहिन्दूविश्वविद्यालये (BHU) संस्कृतविभागे सुदीर्घकालं यावत् आचार्यपदालङ्कृत्य सेवां कृत्वा सम्प्रति सेवानिवृत्तम् अभवत्। अस्य विद्वत्तायाः मुख्यक्षेत्रं भवति नव्यव्याकरणं पाणिनीयभाषाविज्ञानं च। गुजरातराज्यस्य श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिपदे (२०१८-२० २०२१) कुशलतापूर्वकं सः कार्यं कृतवान्। ततः पूर्वं फ्रान्सदेशस्य सोर्बोन्-नुवेल्-विश्वविद्यालये अतिथि-आचार्यरूपेण अपि संस्कृतस्य अध्यापनं कृतवान्। साहित्यिकक्षेत्रे तस्य योगदानमहत्तरं वर्तते। प्रो. मिश्राय २०२२ तमे वर्षे साहित्य-अकादमी-अनुवाद-पुरस्कारः प्रदानं कृतम्। अयं पुरस्कारः तस्य 'अमृतफलम्' इति कृतये दत्तः, या ओडिया-साहित्यकारस्य डॉ. मनोज-दासस्य सुप्रसिद्धस्य उपन्यासस्य संस्कृत-अनुवादः अस्ति। सः संस्कृतभाषायाम् अनेकानि लघुकथासंग्रहाणि, काव्यानि, यात्रावृत्तान्तानि च लिखितवान्, येषु 'पुरस्तात् पेरिस्' तथा 'अकथितं किञ्चित्' इत्यादयः कृतयः प्रसिद्धाः

सन्ति। संस्कृतस्य प्रचाराय प्रसाराय च सः 'संस्कृतभारती' इति संस्थायाः अखिलभारतीय-अध्यक्षरूपेण सम्प्रत्यपि निरन्तरं मार्गदर्शनं कुर्वन् अस्ति। सः सरलसंस्कृतभाषया जनसामान्यं प्रति संस्कृतं नेतुं पूर्णतः कटिबद्धः अस्ति।

### 3.अमृतफलोपन्यासस्य कथासारः

*"यां चिन्तयामि सततं मयि सा विरक्ता*
*साऽप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।*
*अस्मत्कृते च परिशुष्यति काचिदन्या*
*धिक् तां च तं च मदनं च इमां च मां च ।।"* [1]

इति भर्तृहरिप्रणीतशतकत्रयेषु अन्यतमं नीतिशतकस्य श्लोकविशेषः। अयं श्लोकः आधारीभुतः भवति अमृतफलम् इत्यस्मिन् ग्रन्थे। श्लोकस्य मर्मादीन्नुभुय ओडिआकथाकारः डॉ.मनोजदासः प्रायसः २०००वर्षेभ्यः पूर्वेघटितांघटनावलीनां पुनरावृत्तिकृत्वा ऐतिह्यचरित्रेण सह आधुनिकचरित्रस्य सार्थकसामञ्जस्यप्रतिपादनम्, ऐतिह्यचरित्रेण भर्तृहरिणा सह आधुनिकचरित्रामरनाथस्य सार्थकं सामञ्जस्यप्रतिपादनेन्नमृतफलोपन्यासः अग्रे गच्छति। आधुनिकशैल्यां पुराघटितांघटनावलीनाम् उपस्थापनाऽस्योपन्यासस्य मौलिकतां प्रतिपादयति।

अमृतफलमित्युपन्यासस्य कथावस्तु उज्जयीन्याः आमोदप्रियलोकप्रियप्रजावत्सलस्य राज्ञोभर्तृहरेः जीवने घटिताम् एकां घटनां स्वीकरोति। कदाचित् कश्चन चण्डमुनिनामधेयः मुनिः भर्तृहरेः राजसभायां समागत एवं राज्ञः कृते उपायनिवृतवान् अलौकिकं फलविशेषम्। अस्य फलस्य आस्वादने भविष्यति अलौकिकं चमत्कारम्। यः फलस्य भक्षणं करिष्यति सः नीरामयतापूर्वकनवयौवनं प्राप्यति। मूमुर्षुरपि तस्य फलस्य भक्षणे भविष्यति दीर्घजीवीनवयुवकश्च। अतः तादृशस्य अलौकिकफलस्य भक्षणार्थमुपयुक्तपात्रविशेषः भर्तृहरिः इति चण्डमुनिनाविवेचितम् एवं भर्त्तुहरये प्रदत्तवान् तच्चामृतफलम्। परन्तु विलासप्रियराजाभर्तृहरिः फलं साम्राज्ञ्यै सिन्धुमत्यै अर्पितवान् एवम् अत्यन्तं संतोषमनुभुतवान्। पुनश्च कियतकालान्तरे पुनः तदमृतफलम् उज्जयीन्याः प्रसिद्धनर्त्तकी मालविका राज्ञे प्रदत्तवती। अतः सविस्मयराजा अमृतफलस्य पुनः प्राप्तिः विषये अनुसन्धानं कृतवान्, एवं ज्ञातवान् तदेवालौकिकफलं राज्ञी अमात्यजयकान्ताय दत्तवती। तत्पश्चादमात्यजयकान्तः तत् फलं तस्य हृदयेश्वर्यै नर्तकीमालविकायै दत्तवान्, एवं मालविका पुनः राज्ञे दत्तवती इति। एतादृक् घटनादिं राज्ञः हृदये संचारयन्ति गभीरप्रतिक्रियां एवमुदयति संसारं प्रति वैराग्यम्। अतः सः स्वस्य साम्राज्यं कनिष्ठभ्रात्रे विक्रमादित्याय समर्पितवान् एवम् आचरितं सन्यासधर्मं धारयतिसंसारवैराग्यम्।

भर्त्तृहरिणा सह आधुनिकस्य पात्रविशेषस्य अमरनाथस्य सामञ्जस्यताप्रतिपादनपूर्वकं कथाकारः डॉ.मनोजदासः ओडिआभाषायां प्रणीतवान् उपन्यासम् अमृतफलम्। अत्र प्रणीतोपन्यासस्य कथावस्तु भवति ऐतिहासिकवास्तविकतयोः मिश्रितरसालमुपस्थापनम्। पक्षे एकः राजाभर्तृहरिः एवमपरपक्षे भवति विशिष्टशिल्पपतिरमरनाथः। पुनः फललाभच्छलेन राज्ञः हृदये समागच्छन्ति बहवजीवनोद्देश्यप्रश्नाः एवं प्राप्तवान् समाजस्य वास्तविकतोत्तरम्। पक्षान्तरे अमरनाथः भर्तृहरेः चरित्रादेव स्वस्य अशान्तहृदयस्य विविधानां प्रश्नानां समुचितोत्तराणि प्राप्तिपूर्वकं संसारस्य वास्तविकतामनुभूतवान्। इदमेव अस्योपन्यासस्य विषयवस्तु कथावस्तु वा।

### 4.अमृतफलोपन्यासस्य विषयविन्यासे शैलीतत्वम्

अत्र मनोजदासेन विरचितस्य अमृतफलोपन्यासस्य गोपबन्धुमिश्रेण विहितं संस्कृतानुवादस्य शैलीगतानां संरचनात्मकानां च पक्षाणां विश्लेषणं विहितम्। अत्र लेखकः कथम् अलौकिक-यथार्थवाद' (Magic Realism) तथा 'द्वि-भाषिक-कथा' (Dual Narrative), प्रतीकात्मकता Meta fiction इत्यनयोः प्रयोगेण उपन्यासे दार्शनिकं विमर्शं स्थापितवान् तद्सर्वम् आलोचयामः। अतादृशी उपन्यासस्य विषयविन्यासे शैलीतत्वम्-

### 5.अलौकिकयथार्थवादः (Magic Realism)

अस्मिन् उपन्यासे मनोजदासः 'अलौकिकयथार्थवादस्य' अतीव सूक्ष्मं प्रयोगं कृतवान्। अत्र 'अमृतफलम्' केवलं कश्चन चमत्कारफलविशेषः नास्ति फलं भवति अलौकिकयथार्थवादस्य प्रतीकम्। लेखकः अलौकिकं तत्त्वं तादृश्या सहजया उपस्थापयति यत् पाठकः तस्य अस्तित्वे सन्देहं कर्तुं न शक्यते। यथा सामान्यजीवने सुख-दुःखानि यथार्थानि सन्ति, तथैव अस्मिन् उपन्यासे अमृतफलस्य प्राप्तिः तस्य प्रभावाश्च वास्त्विकाः प्रतीयन्ते। एषा शैली तर्कप्रधानम् आधुनिकं मनः कल्पनातत्त्वेन सह योजयित्वा एकम् 'उच्चतरचिरन्तन-सत्यं' प्रकटयति, यत्र भौतिकनियमैः सह आध्यात्मिकशक्तयः अपि कार्यं कुर्वन्ति। लेखकः अत्यन्तमार्मिकरूपे अलौकिकयथार्थवादस्य प्रयोगं कृतवान्। अतादृशि लेखकः उपस्थापयति – *"यज्ञस्य प्रबन्धः अभवत्। भर्तृहरिः अमृतफलम् उदसृजत् ऊर्ध्वमुख्याः नीलाभायाः सुवर्णमृय्याः अग्निशिखायाः माध्यमेन तस्य उत्सम् उद्दिश्य।"*[2] पुनश्च तत्रोपस्थापितमस्ति मनिषायाः चिक्रित्सा

प्रसङ्गे - *"अमर ! मनीषायाः संज्ञा प्रत्यागता अस्ति। आश्चर्यप्रदा प्रगतिः परिलक्ष्यते तस्याः अवस्थायाम्। सा त्वाम् अन्विष्यति। चौधुरी प्रेषितवान् अस्ति वार्तावहम्।"*

*"अमरनाथः तथापि ध्यानस्थः सन् अनुभवति स्म - अनुभवति स्म भर्तृहरिणा सह एकात्मताम्। अद्यापि सम्भवतः तस्य ध्यानगुहायां कस्मिंश्चित् गोपनस्थाने सुरक्षितं स्यात् तत् अम्लानं फलम् - तस्य सहायतया सः मनीषायै दास्यति नूतनं जीवनम् - तादृशः अदम्यः आग्रहः, तत् कौतूहलम्, सा आकाङ्क्षा- सर्वं किमपि विलीनं जातम् आसीत् निजहृदयस्य अन्तः प्रज्वलितायाम् नीलाभायां सुवर्णमय्याम् अग्निशिखायाम् । स्निग्धे गङ्गावक्षसि प्रतिफलितं भवति स्म-मुदुसूर्यालोकरूपेण-सा अनिर्वाणशिखा।"*[3] अत्र अलौकिकयथार्थवादस्य सफलप्रयोगः परिदृश्यते।

### 6.प्रतीकात्मकता (Symbolism)

उपन्यासस्य संरचनायां प्रतीकानां विशेषं महत्त्वं वर्तते। अत्र 'फलम्' केवलं भोजनस्य वा अमरतायाः साधनं नास्ति, एतत्तु 'ज्ञानस्य' तथा 'परमचेतनायाः' प्रतीकं वर्तते। यदा राजा भर्तृहरिः सत्यस्य अन्वेषणं करोति, तदा तस्य यात्रा वस्तुतः बहिर्जगतः यात्रा न भूत्वा अन्तःकरणस्य यात्रा भवति। 'गुहा' इत्यस्य शब्दस्य प्रयोगः अपि अतीव अर्थपूर्णः अस्ति; एषा गुहा मनुष्यस्य अन्तःस्थितस्य तस्य एकान्तस्य प्रतीकं वर्तते यत्र गत्वा एव सः आत्मसाक्षात्कारं कर्तुं शक्नोति। अतः प्रतीकात्मकदृष्ट्या एषः उपन्यासः 'अमरत्वं' प्रति विशेष निर्देशं न कृत्वा 'सत्यस्य' अन्वेषणं प्रति संकेतं करोति। अस्य फलस्य स्वरूपविशेषं तथा प्रतीकात्मकता अमृतफले प्रतिपादितमस्ति- *"एतत् फलं यस्याः विभूतेः वाहकम्, एकदा स्वाभाविकभावेन सा विभूतिः मनुष्यस्य कृते प्राप्या भवतु तस्य चेतनागतारोहणस्य एकस्मिन् उत्तुङ्गे पर्याये।" "दीर्घसमयं यावत् भर्तृहरिः फलस्य दिशि निरीक्षमाणः आसीत्। आदिमकालतः अव्याहतायाः, पुरुषपुरुषानुक्रमेण व्याप्तस्य मानवचक्रस्य कदाचित् प्रकाश्यायाः कदाचिदथवा अप्रकाश्यायाः आशायाः आकाङ्क्षायाश्च प्रतीकम् एतत् फलम्। जीवनस्य शत्रुः, प्रणयस्य शत्रुश्च यः मृत्युः तस्य उपरि विजयप्राप्तये मनुष्यस्य अध्यवसायः अनागते भविष्यति इतोऽपि विविधाभिः नूतनधाराभिः प्रवाहितः भविष्यति । किन्तु तादृश्याः सिद्धेः अधिकारी भवितुं मनुष्यस्य केवलम् आशाकाङ्क्षा अथवा केवलम् अध्यवसायः एव पर्याप्तः न- क्रमशः तस्य राज्ञः चेतनायाम् एषा अवधारणा एकेन दृढप्रत्ययरूपेण रूपान्तरिता भवति स्म।"*[4] अत्र प्रतीकस्य सफलप्रयोगः परिदृश्यते।

### 7.मेटा-फिक्शन (Meta-fiction)

'मेटा-फिक्शन' अथवा 'स्व-विमर्शक-कथा' इत्यस्याः शैल्याः माध्यमेन लेखकः पाठकेन सह साक्षात् संवादं करोति। अस्मिन् उपन्यासे लेखकः स्वयं कथाप्रवाहे हस्तक्षेपं कुर्वन् इव भासते, येन कथायाः निर्माणप्रक्रिया अपि कथायाः मुख्यभागः एव प्रतियते। एषा पद्धतिः पाठकाय बोधयति यत् सः केवलं एकां प्राचीनां गाथां न शृणोति, सा कथा वर्तमानकाले कथमपि तस्य जीवनेन सह सम्बद्धा अस्ति सत्यापित अनुशीलनं करोति। एतेन प्रक्रियायां कथायाः प्राचीनता आधुनिकपरिवेशे सजीवं भवति। अतः पाठकः केवलं प्रेक्षकः न भूत्वा चिन्तनप्रक्रियायाः सहभागी भवति।

### 8.भाषिकीविशिष्टता अर्थगाम्भिर्यञ्च (Linguistic Excellence)

अस्मिन उपन्यासे भाषायां वैदुष्यं सरलता च द्वयमपि सन्तुलितरूपेण दृश्यते। तस्य भाषा सरला अस्ति, किन्तु तस्याः गाम्भीर्यं वर्तते। सः संस्कृतशब्दावलीं तथा दार्शनिकसूत्राणि तादृश्या कौशलेन प्रयुक्तवान् यत् कथायाः रसास्वादने सहायकं भवति। तस्य गद्यसाहित्ये एकं काव्यमयं सौन्दर्यं वर्तते, यत् जटिलान् दार्शनिकविचारान् अपि सामान्यपाठकस्य कृते बोधगम्यं करोति। एषा भाषिकीशब्दगाम्भिर्य एव उपन्यासस्य प्रभावशीलतां बहुगुणीकरोति। यथा उपन्यासे शिवदासस्य मृत्यु प्रसङ्गे वर्णितमस्ति – *"यः शिवदासः ह्यस्तनं सार्यं यावत् राज्ञः कृते आसीत् ज्ञानस्य शिखातुल्यः, अद्य सायं सः लेलिह्यमानायाः अग्नेः शिखायाः अन्तः विलीनः अभवत्। अविचलेन ध्यानेन तां चितां पश्यन् आसीत् राजा- अन्तिमा शिखा आकाशं कमपि संकेतं दत्त्वा यदा अदृष्टा अभवत् तावत्कालं यावत्। कुत्र गतं शिवदासस्य समग्रं ज्ञानम् ? जातं सर्वं भस्मनि परिणतम् ? तस्मिन् ज्ञानप्रदाहने व्यापृतस्य अग्नेः वर्णे तु कापि भिन्नता नागता। किं तर्हि तस्य ज्ञानस्य मूल्यम् ? अथवा तावतः ज्ञानस्य आहरणस्य पृष्ठे विद्यमानायाः आस्पृहायाः श्रमस्य तपस्यायाः वा किं मूल्यम्?"*[5]

### 9.द्वि-स्तरीय-कथाप्रवाहः (Dual Narrative)

'अमृतफलम्' उपन्यासस्य रचना-कौशलं 'द्वि-स्तरीय-कथाप्रवाहेण' अतीव प्रभावशालि जातम् अस्ति। अत्र लेखकः प्रसंगानुरूपः प्राचीनकालस्य राजा भर्तृहरेः कथां वर्णयति, पक्षान्तरे आधुनिककालस्य नायकस्य अमरनाथस्य कथां उपस्थापयति। एषा शैली केवलं द्वयोः कथानां मिश्रणं नास्ति, अपितु एषा कालस्य निरन्तरतामपि (Continuity of Time) दर्शयति। यदा पाठकाः राज्ञः भर्तृहरेः वैराग्यं, तस्य 'अमृतफल' प्राप्तिं तथा च तस्य आन्तरिकं द्वन्द्वादिविषयान् पठन्ति, तद्वदैव आधुनिकपरिवेशे अमरनाथस्य जीवने

अपि तादृशाः एव प्रश्नाः उत्पद्यन्ते। एतेन 'द्विभाषिक-कथा-तन्त्रेण' (Dual Narrative Technique) लेखकः एतत् उपस्थापयति यत् मनुष्यस्य सत्यस्य अन्वेषणं, तस्य तृष्णा, तस्य च आध्यात्मिक-जिज्ञासा शाश्वतनिरन्तरः अस्ति—सा केवलं केनचित् युगेन वा कालेन वा सीमिता नास्ति। अस्याः शैल्याः मुख्योद्देश्यः अस्ति यत् इयं प्राचीनगाथायाः पौराणिकतां आधुनिक-यथार्थवादेन सह योजयति। यदा उभौ प्रवाहौ परस्परं मिलतः, तदा पाठकाः अनुभुयन्ति यत् भर्तृहरिः केवलम् इतिहासस्य कश्चन राजा नास्ति, अपितु सः प्रत्येकस्य मनुष्यस्य प्रतिनिधित्वं करोति यः जीवने पूर्णतां प्राप्तुम् इच्छति। एषा 'द्वि-स्तरीय-कथा' उपन्यासे दार्शनिकीपक्षम् अधिकदृढं करोति।

**10.निष्कर्षः**

'अमृतफल' इति केवलं ऐतिहासिक-पुनरावृत्तिः नास्ति, अपितु शैली-शिल्पयोः उत्कृष्टः प्रयोगः अस्ति। मनोजदासेन प्राचीना भारतीय-कथा-पद्धतिः आधुनिक-पाश्चात्य-उपन्यास-शैल्या सह संयोजिता। एषः उपन्यासः सिद्धं करोति यत् इतिहासः केवलं व्यतीतः समयः नास्ति, अपितु सः वर्तमाने अपि जीवति। शैलीदृष्ट्या एषा कृतिः पाठकान् बौद्धिक-आध्यात्मिकस्तरेषु तृप्तिं ददाति।

**अन्त्याटीकाः**

1. भर्तृहरि, *नीतिशतकम्, चौखम्भा प्रकाशन, वाराणसी,२०११, श्लोक-२, पृ-२।*
2. मिश्र, गोपबन्धुः, *"अमृतफलम्",* साहित्य अकादेमी, नवदेहेल्ली (११०००१), २०२०, *पृ-१९२।*
3. तत्रैव, पृ-१९२।
4. तत्रैव, पृ-१९२।
5. तत्रैव, पृ-१५९।

**सहायकग्रन्थसूची**

1. दास, मनोज *"अमृतफल"* विद्यापुरी बालुकाबजार, कटक (७५३००२), २०१९।
2. मिश्र, गोपबन्धुः, *"अमृतफलम्" (संस्कृतभाषान्तरणम्),* साहित्य अकादेमी, नवदेहेल्ली (११०००१), २०२०।
3. भर्तृहरि, *नीतिशतकम्, चौखम्भा प्रकाशन, वाराणसी,२०११।*
4. A.B. Keith, *A History of Sanskrit Literature*, Oxford University Press, Amen House, London E.C.-4, 1920.
5. कर, भुवनेश्वर, *संस्कृतसाहित्यर इतिहास (Translation of A.B. Keith ),* ओडिशा राज्य पाठ्यपुस्तक प्रणयन ओ प्रकाशन संस्था, पुस्तक भवन, भुवनेश्वर,२०१५।
6. Sahoo, Krushna Charan. *Manoj Das: A Study in Vision and Technique.*